**Series SMA**

कोड नं. **49**
Code No.

रोल नं.
Roll No.

परीक्षार्थी कोड को उत्तर-पुस्तिका के मुख-पृष्ठ पर अवश्य लिखें ।
Candidates must write the Code on the title page of the answer-book.

- कृपया जाँच कर लें कि इस प्रश्न-पत्र में मुद्रित पृष्ठ 12 हैं ।
- प्रश्न-पत्र में दाहिने हाथ की ओर दिए गए कोड नम्बर को छात्र उत्तर-पुस्तिका के मुख-पृष्ठ पर लिखें ।
- कृपया जाँच कर लें कि इस प्रश्न-पत्र में 12 प्रश्न हैं ।
- **कृपया प्रश्न का उत्तर लिखना शुरू करने से पहले, प्रश्न का क्रमांक अवश्य लिखें ।**
- इस प्रश्न-पत्र को पढ़ने के लिए 15 मिनट का समय दिया गया है । प्रश्न-पत्र का वितरण पूर्वाह्न में 10.15 बजे किया जाएगा । 10.15 बजे से 10.30 बजे तक छात्र केवल प्रश्न-पत्र को पढ़ेंगे और इस अवधि के दौरान वे उत्तर-पुस्तिका पर कोई उत्तर नहीं लिखेंगे ।
- Please check that this question paper contains 12 printed pages.
- Code number given on the right hand side of the question paper should be written on the title page of the answer-book by the candidate.
- Please check that this question paper contains 12 questions.
- **Please write down the Serial Number of the question before attempting it.**
- 15 minutes time has been allotted to read this question paper. The question paper will be distributed at 10.15 a.m. From 10.15 a.m. to 10.30 a.m., the students will read the question paper only and will not write any answer on the answer-book during this period.

# संस्कृतम् (ऐच्छिकम्)

## SANSKRIT (Elective)

*निर्धारित समय : 3 घण्टे* | *अधिकतम अंक : 100*

*Time allowed : 3 hours* | *Maximum Marks : 100*

*निर्देशाः :*

*निर्देश :*

***Instructions :***

1. *उत्तराणि उत्तरपुस्तिकायाम् एव लेखनीयानि ।*

   *उत्तर उत्तर-पुस्तिका में ही लिखें ।*

   *Write answers in the answer-sheet only.*

2. *संकेताभावे सर्वेषां प्रश्नानामुत्तराणि संस्कृतेनैव लेखनीयानि ।*

   *जहाँ संकेत न हो, वहाँ सभी प्रश्नों के उत्तर संस्कृत में ही लिखें ।*

   *Answer all questions in Sanskrit unless instructions are given otherwise.*

*अस्मिन् प्रश्नपत्रे* ***चत्वारः*** *खण्डाः सन्ति ।*

*इस प्रश्न-पत्र में* ***चार*** *खण्ड हैं ।*

*There are* ***four*** *sections in this question paper.*

| | | |
|---|---|---|
| खण्डः क | अपठितांश – अवबोधनम् (अपठितांश – अवबोधन) | 15 अङ्काः |
| SECTION A | (Unseen Reading Comprehension) | |
| खण्डः ख | संस्कृतेन रचनात्मकलेखनम् (संस्कृत में रचनात्मक लेखन) | 15 अङ्काः |
| SECTION B | (Writing Skills in Sanskrit) | |
| खण्डः ग | पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः (पठितांश – अवबोधन एवं संस्कृत साहित्य-परिचय) | 40+10=50 अङ्काः |
| SECTION C | (Reading Comprehension and Introduction to History of Sanskrit Literature) | |
| खण्डः घ | छन्दोऽलङ्काराः (छन्द एवं अलङ्कार) | 20 अङ्काः |
| SECTION D | (Metres and Figures of Speech) | |

## खण्डः क (SECTION A)

### अपठितांश – अवबोधनम्
### अपठितांश – अवबोधन
### Unseen Reading Comprehension *15 अङ्काः*

1. अधोलिखितम् अनुच्छेदद्वयं पठित्वा प्रदत्तान् प्रश्नान् संस्कृतेन उत्तरत :

अधोलिखित दोनों अनुच्छेदों को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

Read the following **two** passages and answer the given questions in Sanskrit :

(क) **प्रथमः अनुच्छेदः**

एकदा एकः सम्राट् रथे उपविश्य राजमार्गेण गच्छति स्म । किञ्चिदग्रे कश्चन संन्यासी रथस्य पुरतः आगतः । सम्राट् क्रोधेन अगर्जत् — "अये कस्त्वम् ?" संन्यासी सम्राजः समक्षं स्थित्वा अवदत् — "अहमस्मि सम्राट् ।" क्रुद्धः राजा अवदत् — "जीर्णवस्त्रधारी नग्नपादः कथं सम्राट् भवितुम् अर्हति ?" संन्यासी अवदत् — "किं सुवर्णरथारूढः अहङ्कारी सम्राट् भवितुम् अर्हति ? सम्राट् तु जितक्रोधः विनम्रः भवति ।" लज्जितः सम्राट् संन्यासिनः पादयोः अपतत् ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. $\frac{1}{2}\times2=1$

(i) सम्राजः रथस्य अग्रे कः आगतः ?

(ii) संन्यासिनः पादयोः लज्जितः कः अपतत् ?

(ब) पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. $2\times1=2$

सम्राट् कीदृशः भवति ?

(स) यथानिर्देशम् उत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed. $\frac{1}{2}\times4=2$

(i) 'अगर्जत्' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'क्रुद्धः' इति पदस्य विशेष्यं किम् ?

(iii) 'पश्चात्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iv) 'सम्मुखम्' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(ख) **द्वितीयः अनुच्छेदः**

बिहारराज्ये एकः ग्रामः अस्ति । एतस्मिन् ग्रामे यदि बालिकाशिशुः जायेत तर्हि गृहजनाः तन्निमित्तीकृत्य ग्रामे सहर्षं सस्यारोपणं कुर्वन्ति । एषा परम्परा अत्र बहुकालात् प्रचलति । तस्मात् एतस्मिन् ग्रामे इदानीं प्रायः विंशतिसहस्राधिकानि सस्यानि सन्ति । समीपस्थाः ग्रामाः प्रायः सस्यहीनाः कान्तिहीनाः इव भासन्ते । प्रतिकन्याशिशु दश सस्यानि तस्मिन् ग्रामे रोप्यन्ते । अतः तस्मिन् ग्रामे हरितसमृद्धिः आर्थिकलाभः च भवति । एतस्य ग्रामस्य निवासिनः कन्यां लक्ष्मीस्वरूपां मन्यन्ते । प्रायः गृहेषु यदि कन्यायाः जन्म भवति तर्हि बहुत्र विषादः प्रदर्श्यते — 'अहो ! पुत्री जाता इति ।' अयं ग्रामः समस्तदेशाय आदर्शं स्थापयति । बिहारप्रान्तस्य मुख्यमन्त्रिणा अयं ग्रामः 'आदर्शग्रामः' इति पुरस्कृतः ।

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
Answer in one word. *1×2=2*

(i) प्रायः यदि कन्यायाः जन्म भवति तदा बहुत्र किं प्रदर्श्यते ?

(ii) प्रतिकन्याशिशु कति सस्यानि रोप्यन्ते ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
Answer in a complete sentence. *2×1=2*

एतस्य ग्रामस्य निवासिनः कन्यां किं मन्यन्ते ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. *1×4=4*

(i) 'प्रचलति' इति क्रियापदस्य कर्तृपदं किम् ?

(ii) 'दुःखम्' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(iii) 'अल्पकालात्' इति पदस्य किं विलोमपदम् अत्र प्रयुक्तम् ?

(iv) 'समीपस्थाः' इति पदस्य विशेष्यं किम् ?

(द) अस्य अनुच्छेदस्य कृते उपयुक्तं शीर्षकं संस्कृतेन लिखत ।
इस अनुच्छेद के लिए उपयुक्त शीर्षक संस्कृत में लिखिए ।
Write a suitable title for this passage in Sanskrit. 2

## खण्डः ख (SECTION B)

### संस्कृतेन रचनात्मकलेखनम्
### संस्कृत में रचनात्मक लेखन
### Writing Skills in Sanskrit

*15 अङ्काः*

**2.** मञ्जूषातः उचितसङ्केतान् गृहीत्वा अधोलिखितां कथां पूरयित्वा लिखत :

मञ्जूषा से उचित सङ्केत लेकर निम्नलिखित कथा को पूरा कर लिखिए :

Complete and rewrite the following story, with the help of the words given in the box below : *1×10=10*

कथा

एकदा भगवान् गौतमबुद्धः स्वशिष्यैः (i) ______________ सभायां ध्यानमग्नः विराजते स्म । कश्चित् बहिः स्थितः जनः (ii) ______________ अवदत् — "कथं मह्यं सभायाम् उपवेशनस्य (iii) ______________ न प्रदीयते ?" बुद्धः पुनः नेत्रे (iv) ______________ ध्यानमग्नः अभवत् । सः जनः पुनः पुनः क्रोधोन्मत्तः (v) ______________ आक्रोशत् । कश्चित् शिष्यः (vi) ______________ न्यवेदयत् — "भगवन् ! तस्मै प्रवेशाय कृपया अनुमतिं (vii) _________" इति । बुद्धदेवः (viii) _________ उन्मील्य अवदत् — "सः अस्पृश्यः ।" शिष्यः अपृच्छत् — "अस्माकं धर्मे तु (ix) __________ नास्ति । कथं सः अस्पृश्यः ?" बुद्धः अवदत् — "यः क्रोधं करोति सः (x) __________ एव ।" इति ।

**मञ्जूषा**

| |
|---|
| नेत्रे, क्रोधेन, निमील्य, भूत्वा, सह, अनुमतिः, ददातु, जातिभेदः, नम्रतया, अस्पृश्यः । |

**3.** मञ्जूषातः पदानि चित्वा 'वसुधैव कुटुम्बकम्' इति विषयम् अधिकृत्य **पञ्च** वाक्यानि संस्कृतेन लिखत ।

मञ्जूषा से पद चुनकर 'वसुधैव कुटुम्बकम्' विषय पर संस्कृत में **पाँच** वाक्य लिखिए ।

Write **five** sentences in Sanskrit describing 'Vasudhaiva Kutumbakam' with the help of the words given in the box below. *1×5=5*

**मञ्जूषा**

| |
|---|
| उदारपुरुषाः, सर्वं जनं, स्वार्थरहिताः, इदं मम इति भावनया अस्पृष्टः, आत्मवत्, विश्वस्य कल्याणाय, बलिदानम्, उदात्तं चरित्रम्, वेदेषु उपदिष्टम्, परदुःखम्, आत्मनः वत् । |

## खण्डः ग (SECTION C)

**पठितांश – अवबोधनम् संस्कृतसाहित्यस्य परिचयः**
**पठितांश – अवबोधन एवं संस्कृत साहित्य-परिचय**

**Reading Comprehension and Introduction to History of Sanskrit Literature** *40+10=50 अङ्काः*

**4.** अधोलिखितं गद्यांशं, पद्यं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नान् संस्कृतेन उत्तरत :
निम्नलिखित गद्यांश, पद्यांश तथा नाट्यांश को पढ़कर दिए गए प्रश्नों के उत्तर संस्कृत में दीजिए :

**Read the following prose, poetry and drama passages and answer the given questions in Sanskrit :**

(क) **गद्यांशः**

"अस्मिन समये एकः षोडशवर्ष-देशीयो गौरो युवा हयेन पर्वतश्रेणीरुपर्युपरि गच्छति स्म । एष सुघटितदृढशरीरः श्यामश्यामैर्गुच्छगुच्छैः कुञ्चितकुञ्चितैः कचकलापैः दूरागमनायासवशेन सूक्ष्म-मौक्तिक-पटलेनेव स्वेदबिन्दु-व्रजेन समाच्छादितललाट-कपोल-नासाग्रोत्तरोष्ठः कोऽपि शिववीरस्य विश्वासपात्रं सिंहदुर्गात् तस्यैव पत्रमादाय तोरणदुर्गं प्रयाति ।"

**प्रश्नाः**

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
**Answer in one word.** *$\frac{1}{2}$×2=1*

(i) युवा केन पर्वतश्रेण्याः उपरि गच्छति स्म ?
(ii) कस्य विश्वासपात्रम् तोरणदुर्गं प्रति प्रयाति ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
**Answer in a complete sentence.** *1×2=2*

शिववीरस्य विश्वासपात्रम् किमादाय कुत्र प्रयाति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
**Answer as directed.** *$\frac{1}{2}$×4=2*

(i) 'गच्छति स्म' इति क्रियापदस्य कर्तृपदं किम् ?
(ii) 'स्थूल' इति पदस्य किम् विलोमपदमत्र प्रयुक्तम् ?
(iii) 'केशसमूहैः' इति पदस्य किं पर्यायपदम् अत्र प्रयुक्तम् ?
(iv) '<u>तस्यैव</u> पत्रम् आदाय ........' इति वाक्ये 'तस्य' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(ख) पद्यम्

"विपदि धैर्यमथाभ्युदये क्षमा,
सदसि वाक्पटुता युधि विक्रमः ।
यशसि चाभिरुचिर्व्यसनं श्रुतौ
प्रकृतिसिद्धमिदं हि महात्मनाम् ॥"

प्रश्नाः

(अ) एकपदेन उत्तरत ।
एक शब्द में उत्तर दीजिए ।
**Answer in one word.** $\frac{1}{2}\times2=1$

(i) महात्मनां कुत्र वाक्पटुता प्रदर्श्यते ?

(ii) महात्मनां व्यसनं कुत्र वर्तते ?

(ब) पूर्णवाक्येन उत्तरत ।
पूर्ण वाक्य में उत्तर दीजिए ।
**Answer in a complete sentence.** $2\times1=2$

महात्मनां किं किं प्रकृतिसिद्धं भवति ?

(स) यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed. $\frac{1}{2}\times4=2$

(i) 'वेदे' इत्यर्थे किं पदमत्र प्रयुक्तम् ?

(ii) 'संपदि' इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?

(iii) प्रथमपंक्तौ किमव्ययपदम् ?

(iv) 'इदं' सर्वनामपदं कस्मै संज्ञापदाय प्रयुक्तम् ?

(ग) नाट्यांशः

"*लवः* — (प्रविश्य, स्वगतम्) अविज्ञातवयः क्रमौचित्यात् पूज्यानपि सतः कथमभिवादयिष्ये ? (विचिन्त्य) अयं पुनरविरुद्धप्रकार इति वृद्धेभ्यः श्रूयते । (सविनयमुपसृत्य) एष वो लवस्य शिरसा प्रणामपर्यायः ।

*अरुन्धतीजनकौ* — कल्याणिन् ! आयुष्मान् भूयाः ।

*कौसल्या* — चिरं जीव ।

*अरुन्धती* — एहि वत्स ! लवमुत्सङ्गे गृहीत्वा (आत्मगतम्) दिष्ट्या न केवलम् उत्सङ्गश्चिरान्मनोरथोऽपि मे पूरितः ।"

प्रश्नाः

(अ) एकपदेन उत्तरत ।

एक शब्द में उत्तर दीजिए ।

Answer in one word. $\frac{1}{2}\times2=1$

(i) अरुन्धती कम् उत्सङ्गे गृह्णाति ?

(ii) अयम् प्रणामप्रकारः केभ्यः श्रूयते ?

(ब) पूर्णवाक्येन उत्तरत ।

पूर्ण वाक्य में उत्तर दीजिए ।

Answer in a complete sentence. $2\times1=2$

अरुन्धती लवम् उत्सङ्गे गृहीत्वा किं वदति ?

(स) यथानिर्देशम् उत्तरत ।

यथानिर्देश उत्तर दीजिए ।

Answer as directed. $\frac{1}{2}\times4=2$

(i) 'आयुः' इति अर्थे किं पदमत्र प्रयुक्तम् ?

(ii) 'अपसृत्य' इति पदस्य किं विलोमपदमत्र प्रयुक्तम् ?

(iii) 'मनोरथोऽपि <u>मे</u> पूरितः ....' इति वाक्ये 'मे' इति सर्वनामपदं कस्मै प्रयुक्तम् ?

(iv) 'अयम्' इति सार्वनामिकविशेषणस्य विशेष्यं किम् ?

**5.** शब्दार्थान् मेलयित्वा लिखत ।

शब्दों का अर्थों से मिलान करके लिखिए ।

Match the words with their meanings and rewrite the same. $\frac{1}{2}\times4=2$

| | शब्दाः | | अर्थाः |
|---|---|---|---|
| (अ) | नार्दति | (i) | गर्वविशः |
| (ब) | स्मयावेशः | (ii) | ब्रह्मचारी |
| (स) | अन्वयुङ्क्त | (iii) | न याचते |
| (द) | वर्णी | (iv) | अपृच्छत् |

**6.** रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत :

रेखाङ्कित पदों के आधार पर प्रश्न-निर्माण कीजिए :

Frame questions on the basis of the underlined words : $1\times4=4$

(i) न हि एवंविधम् अपरिचितम् इह <u>जगति</u> किञ्चिद् अस्ति ।

(ii) कुमार ! तथा प्रयतेथाः यथा न धिक्क्रियसे <u>गुरुभिः</u> ।

(iii) अपगतमले हि <u>मनसि</u> विशन्ति उपदेशगुणाः ।

(iv) चन्द्रापीडः प्रीतहृदयो <u>स्वभवनम</u>ाजगाम ।

**7.** अधोलिखितभावार्थयोः रिक्तस्थानपूर्तिं मञ्जूषापदसहायतया कुरुत :
निम्नलिखित **दोनों** भावार्थों में मञ्जूषा में दिए गए शब्दों की सहायता से रिक्तस्थानों की पूर्ति कीजिए :
**Fill in the blanks in the following two explanations with the help of the words given in the box :** *3+3=6*

(अ) अन्यदेवाहुर्विद्यया अन्यदाहुरविद्यया,
इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥

भावार्थः

विद्वांसः (i) ______________ अन्यत् (ii) ________________ च अन्यत् फलं प्राप्यते (iii) __________ अस्मभ्यम् (iv) ________ । वस्तुतः विद्या तु (v) ________ भवति अविद्या च भौतिकवादः । द्वयोः मार्गः (vi) ___________ एव भवति ।

(ब) यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः ।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते ।

भावार्थः

श्रेष्ठजनाः यथा (i) _____________ कुर्वन्ति लोकः (ii) ______________ अनुकरणं (iii) ______________ । सः यत् प्रमाणितं करोति (iv) _____________ आदर्शं मत्वा (v) ________ कुर्वन्ति । अतः उत्तमानि कार्याणि एव (vi) ___________ ।

**मञ्जूषा**

| |
|---|
| आचरणम्, अविधया, विद्यया, तदेव, भिन्नः, उपदिशन्ति, कुर्वन्ति, इति, तस्यैव, आध्यात्मिकज्ञानं, पालनम्, कर्तव्यानि । |

**8.** अधोलिखितयोः **श्लोकयोः** अन्वययोः रिक्तस्थानपूर्तिं कुरुत :
निम्नलिखित **दोनों** श्लोकों के अन्वयों में रिक्तस्थान पूर्ति कीजिए :
**Fill in the blanks in the following prose-order-renderings of the two verses :** $1\frac{1}{2}+1\frac{1}{2}=3$

(अ) तं भूपतिर्भासुरहेमराशिं,
लब्धं कुबेरादभियास्यमानात् ।
दिदेश कौत्साय समस्तमेव,
पादं सुमेरोरिव वज्रभिन्नम् ॥

अन्वयः

भूपतिः अभियास्यमानात् (i) __________ लब्धम् सुमेरोः वज्रभिन्नम् (ii) __________ इव भासुरहेमराशिम् समस्तम् एव (iii) ___________ दिदेश ।

(ब) उपार्जितानां वित्तानां त्याग एव हि रक्षणम् ।
तटाकोदरसंस्थानां परीवाह इवाम्भसाम् ॥

अन्वयः

तटाकोदरसंस्थानाम् (i) ________________ परीवाह इव (ii) ______________ वित्तानाम्
(iii) ____________ एव हि रक्षणम् ।

**9.** यथानिर्देशम् उत्तरत ।
यथानिर्देश उत्तर दीजिए ।
Answer as directed.

(अ) कर्तृपदं क्रियापदं च चिनुत ।
कर्ता एवं क्रियापद चुनिए ।
Select the subject and the verb. *1+1=2*

(i) एकं रत्नं यद्वस्तु स्मर्यते तद्ददाति ।

(ii) भो ब्राह्मण ! भवान् यज्ञदक्षिणाकालं व्यतिक्रम्य समागच्छति ।

(ब) विशेषणपदं चिनुत ।
विशेषण पद चुनिए ।
Select the adjective. *1+1=2*

(i) भगवद्वाक्यानि समाप्तानि न भवन्ति ।

(ii) पृथिव्याः सप्त भेदाः ।

(स) अधोलिखितपंक्तिद्वये रेखाङ्कित-सर्वनामपदानि केभ्यः प्रयुक्तानि ?
निम्नलिखित दो पंक्तियों में रेखांकित सर्वनाम पद किनके लिए प्रयुक्त हुए हैं ?
In the following two lines for whom are the underlined pronouns used ? *1+1=2*

(i) श्रीनाथारः स्वल्पभाषी, अतस्तस्य मनःकथा मनोव्यथा वा बोधगम्या नास्ति ।

(ii) प्रभुः जन्म दत्तवान्, सः जीवितुमधिकारमपि दत्तवान् ।

(द) अधोलिखितपंक्तिभ्यां 'सारल्यं' तथा 'ध्यानेन' इति पदयोः समानार्थकपदे चित्वा लिखत :
निम्नलिखित पंक्तियों में से 'सरलता' तथा 'ध्यान से' पदों के समानार्थक पद चुनकर लिखिए :
Select and write the synonyms of 'simplicity' and 'carefully' from the following lines : *1+1=2*

(i) अहितमिव परित्यजन्ति आर्जवम् ।

(ii) सावहिताः शृण्वन्तु भवन्तः ।

(य) कः कं कथयति ?
कौन किसको कह रहा है ?
Who is saying this to whom ? *1+1=2*

(i) "महाराज ! नववार्षिकी मे कन्या ।"

(ii) "पुस्तकं तु शोभनम् परन्तु यदि भवान् हिन्दीभाषायां लिखति तर्हि शोभनं भवति ।"

**10.** (अ) अधोलिखितलेखकानाम् कस्यापि **एकस्य** काव्यस्य नाम लिखत :
निम्नलिखित लेखकों के किसी **एक** काव्य का नाम लिखिए :
Write the name of any **one** work of each of the following poets : *1×5=5*
भर्तृहरिः, पण्डितराजजगन्नाथः, भारविः, माघः, कालिदासः ।

(ब) अधोलिखितरचनानां लेखकानां नामानि लिखत :
निम्नलिखित रचनाओं के लेखकों के नाम लिखिए :
Write the names of the authors of the following works : *1×5=5*
सिंहासनद्वात्रिंशिका, प्रबन्धमञ्जरी, समुद्रसङ्गमः, उत्तररामचरितम्, भगवद्गीता ।

## खण्डः घ (SECTION D)
## छन्दोऽलङ्काराः
## छन्द एवं अलङ्कार
## Metres and Figures of Speech

*20 अङ्काः*

**11.** (अ) प्रश्नान् उत्तरत ।
प्रश्नों के उत्तर दीजिए ।
Answer the questions. *1×4=4*

(i) 'यः' इति पदे स्वरः लघुः गुरुः वा ?

(ii) 'नयनम्' इति पदे कः गणः ?

(iii) प्रतिचरणं शार्दूलविक्रीडितम् इति छन्दसि कति वर्णाः ?

(iv) 'शिखरिणी' इति छन्दसि प्रतिचरणं अन्तिमस्वरौ लघू गुरू वा ?

(ब) अधोलिखितपरिभाषाः पूरयत :
निम्नलिखित परिभाषाओं को पूरा कीजिए :
Complete the following definitions : *1×3=3*

(i) रसैः रुद्रैश्छिन्ना_____ ______ ।

(ii) सूर्याश्वैर्यदि मः सजौ सततगाः __________ ।

(iii) __________ ऽम्बुधिरसनगैर्मोभनो तौ गयुग्मम् ।

(स) अधोलिखितपङ्क्त्याम् किं छन्दः ?
निम्नलिखित पंक्ति में कौन-सा छन्द है ?
What is the metre in the following line ? *1*

निजहृदि विकसन्तः सन्ति सन्तः कियन्तः ?

(द) कस्यचिदेकस्य छन्दसः उदाहरणं लिखत ।
किसी **एक** छन्द का उदाहरण लिखिए ।
Write an example of any **one** of the following metres. *2×1=2*

अनुष्टुप्, उपजातिः ।

12\. (अ) अधोलिखितानाम् अलङ्काराणां परिभाषाः पूरयत :
निम्नलिखित अलङ्कारों की परिभाषाएँ पूरी कीजिए :
Complete the definitions of the following figures of speech : *1×4=4*

(i) साधर्म्यम् ____________ भेदे ।

(ii) तद् ____________ अभेदो य उपमानोपमेययोः ।

(iii) भवेत् सम्भावनो ____________ प्रकृतस्य परात्मना ।

(iv) श्लिष्टैः पदैरनेकार्थाभिधाने _____ ______ ।

(ब) कस्यचिदेकस्य अलङ्कारस्य उदाहरणं लिखत ।
किसी **एक** अलङ्कार का उदाहरण लिखिए ।
Write an example of any **one** of the following figures of speech. *3×1=3*

अर्थान्तरन्यासः, श्लेषः ।

(स) अधोलिखितपंक्तिषु के अलङ्काराः ?
निम्नलिखित पंक्तियों में कौन कौन-से अलङ्कार हैं ?
What are the figures of speech in the following lines ? *1×3=3*

(i) सरसिजमनुविद्धं शैवलेनापि रम्यम् ।

(ii) चन्द्रापीडः ताभिः उपदेशवाग्भिः प्रक्षालित इव ।

(iii) वित्तमदमत्तचित्ताः सर्वजनोपहास्यतामुपयान्ति ।